श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये दशमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये दशमं दशकम् ॥

## सृष्टिभेदवर्णनम्

वैकुण्ठ वर्धितबलोऽथ भवत्प्रसादा -
    दम्भोजयोनिरसृजत् किल जीवदेहान्।
स्थास्नूनि भूरुहमयानि तथा तिरश्चां
    जातीर्मनुष्यनिवहानपि देवभेदान्॥ **10.1** ॥

मिथ्याग्रहास्मिमतिरागविकोपभीति -
    रज्ञानवृत्तिमिति पञ्चविधां स सृष्ट्वा।
उद्दामतामसपदार्थविधानदून -
    स्तेने त्वदीयचरणस्मरणं विशुद्ध्यै॥ **10.2** ॥

तावत् ससर्ज मनसा सनकं सनन्दं
    भूयस्सनातनमुनिं च सनत्कुमारम्।
ते सृष्टिकर्मणि तु तेन नियुज्यमाना
    स्त्वत्पादभक्तिरसिका जगृहुर्न वाणीम्॥ **10.3** ॥

तावत् प्रकोपमुदितं प्रतिरुन्धतोऽस्य
    भ्रूमध्यतोऽजनि मृडो भवदेकदेशः।
नामानि मे कुरु पदानि च हा विरिञ्चे -
    त्यादौ रुरोद किल तेन स रुद्रनामा॥ **10.4** ॥

एकादशाह्वयतया च विभिन्नरूपं
    रुद्रं विधाय दयिता वनिताश्च दत्वा।

तावन्त्यदत्त च पदानि भवत्प्रणुन्नः
प्राह प्रजाविरचनाय च सादरं तम्॥ **10.5** ॥

रुद्राभिसृष्टभयदाकृतिरुद्रसङ्घ -
सम्पूर्यमाणभुवनत्रयभीतचेताः।
मा मा प्रजाः सृज तपश्चर मङ्गलाये -
त्याचष्ट तं कमलभूर्भवदीरितात्मा॥ **10.6** ॥

तस्याथ सर्गरसिकस्य मरीचिरत्रि -
स्तत्राङ्गिराः क्रतुमुनिः पुलहः पुलस्त्यः।
अङ्गादजायत भृगुश्च वसिष्ठदक्षौ
श्रीनारदश्च भगवान् भवदङ्घ्रिदासः॥ **10.7** ॥

धर्मादिकानभिसृजन्नथ कर्दमं च
वाणीं विधाय विधिरङ्गजसङ्कुलोऽभूत्।
त्वद्बोधितैस्सनकदक्षमुखैस्तनूजै -
रुद्बोधितश्च विरराम तमो विमुञ्चन्॥ **10.8** ॥

वेदान् पुराणनिवहानपि सर्वविद्याः
कुर्वन् निजाननगणाच्चतुराननोऽसौ।
पुत्रेषु तेषु विनिधाय स सर्गवृद्धि -
मप्राप्नुवंस्तव पदाम्बुजमाश्रितोऽभूत्॥ **10.9** ॥

जानन्नुपायमथ देहमजो विभज्य
स्त्रीपुंसभावमभजन्मनुतद्वधूभ्याम्।
ताभ्यां च मानुषकुलानि विवर्धयंस्त्वं
गोविन्द मारुतपुरेश निरुन्धि रोगान्॥ **10.10** ॥

॥ इति श्रीमन्नारायणीये दशमं दशकं समाप्तम्॥